44.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Dr. S.C. Upadhyaya
M.A., LL.B., D.Litt.
1970

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीरामगोपालकविकृतं

कीरदूतम्

रुद्रनाथकृतपिकदूतसहितम्

प्राध्यापकेन

श्रीमता अनन्तलालठक्कुरेण

सम्पादितम्

मिथिलाविद्यापीठप्रधानेन प्रकाशितम्

संवत् २०२४] [मूल्यम् १. ७५ रूप्यकाणि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मिथिलाविद्यापीठग्रन्थमाला

प्राचीनाचार्यग्रन्थावली

अष्टादशपुष्पम्

साधारणसम्पादकः

डा० श्रीशीतांशुशेखरवागच्छिः

एम० ए०, डि० लिट्, एल्० एल्० बी

पीठाध्यक्षः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Mithila Institute Series Ancient Text No. 18

KĪRADŪTAM

OF

SRI RĀMAGOPĀLAKAVI

With

PIKADŪTAM

OF

RUDRANĀTHA

EDITED BY

PROF. ANANTALAL THAKUR

1967 *Price Rs. 1·75.*

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Copies of this Volume, postage paid, can be had of the Director, Mithila Institute, Darbhanga, on payment of Rs. 1. 75 by M. O. or Postal Order or Cash.

All rights Reserved

Printed at the Darbhanga Press Company (Pri.) Limited, Darbhanga
by Sri Binda Prasad
and
Published by Dr. S. Bagchi, Director, Mithila Institute, Darbhanga.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

The Government of Bihar established the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object *inter-alia*, to promote advanced studies and research in Sanskrit learning, to bring together the traditional Pandits with their profound learning and the modern scholars with their technique of research and investigations and to publish works of permanent value to scholars. This Institute is one of the six started by this Government as a token of their homage to the tradition and scholarship for which ancient Bihar was noted. Apart from the Mithila Institute, the Nalanda Institute of Post-Graduate Studies and Research in Pali & Buddhist Learning at Nalanda, the Vaisali Institute of Post-Graduate Studies and Research in Jainism and Prakrit Learning, at Vaisali, the K. P. Jayaswal Research Institute, The Institute of Post-Graduate Studies and Research in Arabic & Persian and the Bihar Rashtra Bhasha Parishat for research and advanced studies in Hindi at Patna have been established and are doing useful work. In the establishment of the Mithila Institute the state Government received a generous donation from the late Maharajadhiraja of Darbhanga for construction of the building on a plot of land also donated by him.

As part of this programme of rehabilitating and reorientation of ancient learning and scholarship, the editing and publication of this volume has been undertaken with co-operation of Scholars in Bihar and outside. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ प्राक्कथनम् ॥

अत्रेदं समुपह्रियते संस्कृतकाव्यरसिकेभ्यो विद्वद्भ्यः श्रीरामगोपालकविकृतं कीरदूताख्यं खण्डकाव्यं रुद्रपञ्चाननभट्टाचार्यविरचितेन पिकदूताख्येनापरलघुखण्ड-काव्येन संवलितम्। अद्यत्वे दूतकाव्यानि बहूनि मुद्रितानि, अन्यानि मातृकोदर-पिहितानि समुपलभ्यन्ते। कानिचन पुनर्नाम्नैव इतस्ततः समुल्लिखितानि दृश्यन्ते। कालिदासकृतं मेघदूतं तावत् समुपलब्धेषु दूतकाव्येषु प्राचीनतमं प्रशस्यतमं च वर्तते। दूतकाव्यानां समुद्भवं विकाशं चाधिकृत्य आचार्यवर्येण श्रीमता चिन्ताहरण-चक्रवर्तिपादेन संस्कृतसाहित्यपरिषत्पत्रिकायां (दशमाब्द-चतुर्थसंख्यायां) तथा भारतीयेतिहासत्रैमासिकपत्रिकायां (I H Q Vol. III) विशेषविवेचनं विहितम्। श्रीमता बलदेवोपाध्यायेन नागरीप्रचारिणीपत्रिकायां (संवत् १९८६) श्रीमता वीर-राघवाचार्येण च तेलुगुविद्यापीठपत्रिकायां (Journal of the Telugu Academy, 1929) दूतकाव्येतिहाससंकलनविधौ चक्रवर्तिपादस्याङ्गलभाषामयो निबन्धो भृशं व्यवहृतः। श्रीमता अगरचन्द्नाहटा-महाभागेन च जैनप्रत्नविद्यापत्रिकायां (Jain Antiquary 1935—6) दूतकाव्येतिहासः समालोचितः। श्रीमता सरस्वतीप्रसादचतुर्वेदिमहोदयेन अखिलभारतप्राच्यविद्यामहासम्मेलनस्य पाटलि-पुत्राधिवेशने एतं विषयमवलम्ब्य कश्चन निबन्धः पठितः (Proceedings and Transactions of the Sixth All India Oriental Conference, Patna, page 623 ff) प्रकाशश्चास्य Nagpur University Journal, Dec. 1937 इत्यत्र सञ्जातः। प्राच्यविद्यागवेषणापत्रिकायां (Journal of Oriental Rese-arch, Madras, Vol. X, P. 269 ff.) श्रीमता राधाकृष्णन् नाम्ना विद्वद्वरेण एतद्विषयकः कश्चन निबन्धः प्रकाशितः। स्वर्गतेन डा० यतीन्द्रविमलचतुर्धुरीणेन वङ्गीयदूतकाव्येतिहासः संकलितः। सिंहलदेशीयैर्विद्वद्भिः डि० कुरे महाभागैः कुरुक्षेत्र-विश्वविद्यालयस्थैः श्रीमद्भिः दुर्गादत्तकपिलमहोदयैश्च दूतकाव्यालोचनं समारब्ध-मासीदिति विज्ञायते। राजस्थानवास्तव्येनाचार्येण रामकुमारेण दूतकाव्यसाहित्यस्य सुविस्तृतं समीक्षणं विहितम्। आचार्यस्य श्रीमतः सत्यव्रतमहोदयस्य भारतीय-प्रत्नतत्त्वनिबन्धेषु दूतकाव्यालोचनं विशिष्टं स्थानमधिकरोति। एतेषु सामीक्षिक-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निबन्धेषु बहुत्र बहुशश्चक्रवर्तिमहोदयस्य निबन्धः समुपयुक्तः, न च दृश्यते सर्वत्र सम्यगृणस्वीकारसौजन्यमिति कौतुकावहमेतत्।

चक्रवर्तिपादस्य निबन्धे चर्चितानां केषाञ्चन दूतकाव्यानां प्रकाशनं परवर्तिनि काले संजातम्। चक्रवर्तिमहोदयेनैव धोयिककृतस्य पवनदूतस्य सामीचिकं संस्करणम्, विष्णुदासकृतस्य मनोदूतस्य च प्रथमं संस्करणं कलिकातासंस्कृतसाहित्य-परिषद्ग्रन्थमालायां विहितम्। डा० यतीन्द्रविमलचतुर्धुरीणप्रभृतिभिरपि केषाञ्चन दूतकाव्यानां प्रकाशनं कृतम्। चक्रवर्तिपादानाम् अप्रकाशितचरदूतकाव्यसंग्रहस्य प्रकाशनमभीप्सितमासीत्। तदर्थं कतिचन मातृका अपि तैः संगृहीता आसन्। कार्यान्तरव्यापृतानां तेषां मनोरथस्तु न पूर्णतामधिगतः। प्रेरितश्चाहं तत्रभवद्भिः दूतकाव्यचर्चाविधौ प्राच्यवाणीपत्रिकायां रुद्रनाथपञ्चाननकृतस्य पिकदूतस्य प्रकाशनं विहितवान्। अत्र तैः संगृहीते एव मातृके क-संज्ञिता स्वकीया, ख-संज्ञिता च ढाकाविश्वविद्यालयस्था मदीयं शरणमासीत्। श्रीरामगोपालकविकृतस्य कीरदूत-स्यापि मातृकाप्रतिलिपिस्तेभ्य एवाधिगता। इयमत्र क-संज्ञिता। अस्यां पाठानां नितरामशुद्धतया तत्प्रकाशनं न तदा शक्यक्रियमासीत्। कार्यवशात् मिथिलामण्डलं प्राप्तवतो मे कुतश्चिद् विद्वद्वराद् वङ्गाक्षरमयं ख-संज्ञितं मातृकान्तरमेतस्य समधि-गतम्। इयं मातृका आदावंशतः खण्डिता अशुद्धिबहुला च। उभयोर्मातृकयोरा-लोचनेन कथमपि पाठसंगतिं विधातुं समर्थोऽभूवम्। पिकदूतकीरदूतयोर्विषयगतं साम्यमत्रोभयोरेकत्र ग्रथने हेतुः।

आदितः प्रभृति श्रीमतां चक्रवर्तिपादानामस्मास्वनुग्रहविशेष एवानयोः प्रकाशागमननिदानम्। अत्र भूमिकायोजनपरिश्रमं स्वीकृतवद्भिस्तैर्वयं भूयोऽपि कृतार्थीकृताः। पूज्यचरणाः कविशेखरश्रीमद्बदरीनाथोपाध्यायमहोदया एतयोः पाण्डुलिपिं स्वपावनदृष्ट्या पवित्रीकृतवन्तः। मिथिलाविद्यापीठनिदेशकैः श्रीमद्भिः शीतांशुशेखरवागच्छि, एम्० ए०, डि० लिट् महोदयैः सानुग्रहं मिथिलाविद्यापीठ-ग्रन्थमालायामेतयोः सन्निवेशो विहितः। एतेभ्यः सर्वेभ्यो यथायोगं कृतवेदितां विज्ञपयामीति।

१८८९ शकीयायाम्
वसन्तविजयायाम्

विदुषां वशंवदस्य
श्रीमतोऽनन्तदेवशर्मणो
वैशालीविद्यापीठस्थस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ दूतकाव्यम् ॥

सूचना ॥ कालिदासकृतं मेघदूतं नाम खण्डकाव्यं बहोः कालादतितरां ख्यातिं भजद् विराजते। एतस्य ख्यातेर्निदर्शनम् उपलभ्यमानेषु नानादिग्देशीयैः विद्वद्भिर्विरचितेषु परःशतसंख्यकेषु टीकाग्रन्थेषु तथा दूतकाव्यसन्देशकाव्यादिनाम्ना प्रसिद्धेषु पवनदूताद्यर्वाचीनेष्वसंख्यकेषु काव्येषूपलभ्यते। सुतरांकौतुककरस्य दूतकाव्यसाहित्यस्य विवरणमद्यापि न सम्यक्तया संकलितमिति मन्यामहे। यत् सत्यं त्रिंशद् वर्षेभ्यः प्रागस्माभिरेतद्विषयस्यालोचनस्य यत् सूचनं कृतम्, तदनुसृत्य कैश्चित् पण्डितवर्यैरितस्ततः किञ्चित् किञ्चिदालोचनं कृतम्। तेनापरिचितचराणामपि केषाञ्चिद् दूतकाव्यानां विवरणं समासादितम् ॥

दूतकाव्यपरिचयः ॥ इतः पूर्वमस्माभिः कालिदासानुकृतिभूतानां पञ्चाशद्दूतकाव्यानां परिचयो दत्तः। तानि यथा—विनयविजयगणिरचितमिन्दुदूतम्, माधवशर्मकृतमुद्धवदूतम्, रूपगोस्वामिविरचितोद्धवसन्देशः, रामगोपालस्य कीरदूतम्, उद्दण्डकवेः नृसिंहस्य वेङ्कटाचार्यस्य च कोकिलसन्देशाः, कृष्णतर्कालङ्कारजम्बूकविविनयप्रभूणां चन्द्रदूतत्रयम्, चातकसन्देशः, चेतोदूतम्, मेरुतुङ्गाचार्यस्य जैनमेघदूतम्, वैद्यनाथभट्टाचार्यस्य तुलसीदूतम्, विक्रमकवेर्नेमिदूतम्, कृष्णसार्वभौमस्य पदाङ्कदूतम्, धोयिकवेर्वादिचन्द्रस्य च पवनदूतद्वयम्, भोलानाथस्य पान्थदूतम्, रुद्रन्यायवाचस्पतेः पिकदूतम्, कालीप्रसादस्य भक्तिदूती, वासुदेवस्य भृङ्गसन्देशः, रुद्रन्यायवाचस्पतेः भ्रमरदूतम्, चैतन्यदेवमातुलस्य विष्णुदासस्य त्रैलङ्गव्रजनाथस्य विष्णुदासवंशकरीरस्य रामरामस्य च मनोदूतत्रितयम्, रङ्गाचार्यस्य मयूरसन्देशः, मन्त्रिविक्रमस्य मेघदूतम्, विविधग्रन्थरचयितुर्मेघविजयगणेर्मेघदूतसमस्यालेखः, रथाङ्गदूतम्, लक्ष्मणसूरेर्विप्रसन्देशः चारित्रसुन्दरगणेः शीलदूतम्, लक्ष्मीदासस्य करिङ्गपल्लिनम्बूद्रिकवेः रङ्गाचार्यस्य च शुकसन्देशत्रयम्, अवधूतरामस्य सिद्धदूतम्, नारायणस्य सुभगसन्देशः, रूपगोस्वामिनः वेङ्कटेशस्य भट्टवामनस्य कवीन्द्राचार्यसरस्वतीपादानां च हंसदूतचतुष्टयम्, भट्टहरिहरस्य हृदयदूतं च। एतेषां विशेषविवरणं [1]त्रैमासिक-

---

१. Indian Historical Quarterly, Vol. III.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भारतीयेतिहासपत्रिकायास्तृतीयखण्डात् ज्ञेयम्। कृष्णनाथसार्वभौमादिभिर्विरचितानि वातदूतादीन्याधुनिकानि काव्यानि नात्रोल्लिखितानि ॥

अगरचन्द्रनाहटाप्रभृतिभिः पण्डितवर्यैरप्येतदतिरिक्तानां केषाञ्चन दूतकाव्यानामुल्लेखः कृतः परिचयो वा दत्तः। परमधुनापि का कथा पूर्णपरिचयस्य सर्वेषां सन्देशकाव्यानां नाममात्रमपि विदितमिति न वक्तुमीशा वयम् ॥

अनन्तरं लब्धोदन्तानामेतादृशकाव्यानां मध्ये रामचक्रवर्तिकृतं कपिदूतम्, गङ्गाधरकृतो मधुरोष्ठसन्देशः, नारायणभट्टकृतं कृष्णदूतम्, गङ्गानन्दकवीन्द्रकृतं भृङ्गदूतम्, मद्राजनगरीयप्राच्यमातृकाशालास्थितं चकोरसन्देशद्वयम्, भृङ्गसन्देशनामकमनालोचितपूर्वं काव्यम्, रघुनाथकृतं हंसदूत च विशेषेणोल्लेखमर्हन्ति[1]। द्विपञ्चाशच्छ्लोकात्मकस्य कपिदूतस्य पत्रमात्रं ढाकाविश्वविद्यालयसंग्रहे वर्तते। अत्र गीतया रामसविधे कपिरूपस्य दूतस्य प्रेषणमुपवर्णितमासीदिति प्रतिभाति। रघुनाथकृतस्य हंसदूतस्य मूलमिदानीं नोपलभ्यते। परं नरसिंहदासकृतस्य विंशतिपरिच्छेदात्मकस्यास्य वङ्गभाषानुवादमातृका वङ्गीयसाहित्यपरिषद्ग्रन्थशालायां विराजन्ते। देवदासकृतस्य हंसदूतस्य मूलमात्रस्य सटीकस्य च यन्मातृकाद्वयं ढाकाविश्वविद्यालये विद्यते, ततो रूपगोस्वामिविरचितप्रसिद्धकाव्यस्यैव कर्तृत्वमत्र केनचिद् देवदासे समारोपितमिति प्रतीयते। यद्वा देवदास इत्युपनाम नामविशेषणं वा भवितुमर्हति। वङ्गीयवैष्णवग्रन्थकर्तॄणामेवं मातृकाभेदे नामभेदस्य निदर्शनं नाविरलम् ॥

दूतकाव्योत्पत्तिः ॥ उपलभ्यमानेषु दूतकाव्येषु कालिदासकृतं मेघदूतमेव प्राचीनतमम्, रचनपटुतया भावभाषासमावेशकुशलतया च प्रधानतममेव पदमध्यास्ते सुरभारत्यामिति तु निर्विवादमेव वस्तु। महाकविना कालिदासेन चेदृशकाव्यनिर्माणकल्पना स्वयमेवोद्भाविता पुराणादिषूपवर्णितादाख्यानाद् ग्रन्थान्तराद् वा समधिगतेत्यत्र विषये न किमपि पार्यते प्रतिपादयितुं निःसंशयम्। परं कालिदासात प्राक्तनेऽपि काले अचेतनानां क्षुद्रप्राणीनां वा दूतत्वं कल्पितमेव दृश्यते। तथा च ऋग्वेदे पणीनां सविधे कुक्कुररूपायाः सरमाया दूतीरूपेण प्रेषणमुपनिबद्धम्। श्रूयते नागार्जुनग्रन्थस्य कस्यचित् चैनिकभाषायामनुवादकर्ता हसू कान्नामधेयश्चैनिककविः खृष्टीयद्वितीयशताब्द्यामेव मेघस्य दूतत्वं कल्पयामासेति। कामविलापसंज्ञके च बौद्धजातके कामिना केनचित् काकस्य चेतनावतोऽप्यज्ञानस्य दूतत्वमङ्गीकृतम्। वाचकानां सुखबोधायात्र तज्जातकं समुद्ध्रियते—

१. उत्तुङ्गोदयकृतं मयूरदूतं ध्वन्यालोकलोचनकौमुद्यां समुद्धृतं दृष्टम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तं पण पुरिसं जोवमूले उत्तासेसुं। सो तत्थ णिसिन्नो गच्छन्तं काकं दिस्वा ताव खरं पि तं वेदणं अगणेत्वा पियभरियाय सासणं पेसेतुं काकं आमन्तेन्तो इमा गाथा आहा—

उच्चे सकुण ओमाण पत्तयाव विहङ्गम।
वज्जसि खो त्वं वामुरुं चिर खो सा करिस्सति॥
इदं खो सा न जाणाति असिं सत्तिञ्च च ओड्डितं।
सा चण्डी काहति कोधं तम्मे तपति नो इध॥
एस उप्पलसण्णाहो णिक्खं उस्सीसके कतं।
कासियञ् च मुदुं वत्थं तप्पतु धनकामिया॥

महाभारते नलसकाशादागतं राजहंसं दमयन्ती पुनरपि नलस्य सविधे प्रेषितवतीत्युपवर्णितम्। रामायणे च रामेण सीतान्तिके दूतस्य हनूमतः प्रेषणं समुपनिबद्धम्। एतावता प्रतिभाति यथा कालिदासात् पूर्वमपि केचन चेतनावतां जन्तूनामचेतनानां वा वस्तूनां दूतत्वं कल्पितवन्त इति। एतेभ्य एव कालिदासेन दूत-काव्यप्रणयनप्रवृत्तिरासादिता न वेति न प्रतिपादयितुमीशाः केऽपि। परं 'सीतां प्रति रामस्य हनूमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवानित्याहुः' इति मल्लि-नाथेन मेघदूताद्यश्लोकीयटीकायामुपन्यस्तमिति हनूमतो दौत्यमेव मेघदूतत्वकल्पने निदानमिति प्राचीनानां मतमिति स्फुटम्। 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सेति' मेघदूतवचनमप्येतदेव मतमनुकूलयतीवेति प्रतीयते। परमत्र हनूमतो मानव-स्येव ज्ञानवत्तादीनामुपवर्णनात् महाभारते च हंसस्य तथात्वप्रतिपादनात् काव्यरसा-सद्भावतया जातकवृत्तान्ततश्चैनिककृतितोऽपि वा कालिदासेनेदृशकाव्यनिर्माणधार-णाधिगता भवेदिति प्रतिभाति। परमेतदपि नासंभवि यथा—कविवरेण स्वत एव समुद्भावितमेतदिति। यथा तथा वा भवतु। कालिदासीयमेव वस्तु सर्वेभ्योऽपि रामा-यणादिगतेदृशवस्तुभ्यः रामणीयकत्वादिना परमं स्थानमधिकुर्वद् विराजते इत्यत्र न

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संशयो लेशतोऽपि पदं करोति। श्रीमद्भागवते दशमे स्कन्धे सप्तचत्वारिंशत्तमेऽध्याये समुपवर्णितमुद्धवस्य दौत्यं द्विपञ्चाशत्तमे चाध्याये समुपन्यस्तस्य वृद्धद्विजस्य दौत्यं शृङ्गाररसविषयकमपि कालिदासकाव्यात् प्राचीन कालिदासानुकरणजन्यं वेत्यत्र महान् एव संशयः समुल्लसति सुमनसां मानसपटे। एतच्चात्रावधेयम् यथा दूतकाव्यमूलभूतानामिव प्राचीनप्राचीनानां रामायणमहाभारतोपवर्णितानां रामदमयन्तीप्रेषितानां हनूमद्धंसानां दौत्यमुपाश्रित्य न केनाप्यर्वाचीनेन कविना दूतकाव्यं किञ्चिदपि प्रथितमस्माभिरिदानीमप्युपलब्धम्। विषयान्तराणामितरेषां बहूनामपि दूतकाव्यालम्बनभूतत्वे ईदृशानां रमणीयविषयाणामुपेक्षणीयत्वे न कारणं किमप्युत्पश्यामः॥

कालिदासानुकृतिः॥ यथा तथा वा भवतु, एतत्तु निश्चिततयैव प्रतीयते यथा कालिदासेनैव महाकविचूडामणिना सुरभारत्यां दूतकाव्यप्रणयनं प्रवर्तितमादाविति। एतदपि च निर्विवादं यथा कालिदासादनन्तरं बहुभिरेव सुरसरस्वतीनन्दनैः कविवरैरीदृशकाव्यस्य चमत्कारित्वातिरेकमुपलभमानैरनेकधा कालिदासानुकृतिमुखेन दूतकाव्यानि विविधानि विरचितानीति। तेषु चार्वाचीनेषु वस्तुषु कालिदासानुकरणस्यानुभूयमानत्वेऽपि बहुत्रैव कवित्वमाधुर्यं महदेव विलसतीति निःशङ्कं वचः। कालिदासानुकृतिषु चोपलभ्यमानेषु धोयिकविराजविरचितं पवनदूतमेव प्राचीनतममिति प्रतिभाति। परमासाद्यमानानामपि बहूनामेव दूतकाव्यानां कालस्यानिर्णीतत्वान्नैतद् दार्ढ्येन प्रतिपादयितुमीशा वयम्॥

सुप्राचीनालङ्कारिकभामहकृते च काव्यालङ्कारग्रन्थे भ्रमरादीनामचेतनानां च दूतत्वकल्पनमयुक्तमिति समुल्लिखितत्वात् धोयितः प्राक्तनेऽपि काले कालिदासानुकृतिरूपाणि दूतकाव्यान्यासन्निति निश्चितमनुमातुं प्रभवामः। तथा च भामहवाक्यम्—

अयुक्तिमद् यथा दूता जलभृन्मारुतेन्दवः।
तथा भ्रमरहारितचक्रवाकशुकादयः॥
अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते॥
यदि चोत्कण्ठया यत्तदुन्मत्त इव भासते।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते॥
(भामहालङ्कारे १।४२—४४)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यत्तूक्तं पण्डितवर्येण कीथमहोदयेन[1] यथा वत्सभट्टिनैवादावनुकृतं मेघदूतमिति, तत् तु भ्रमविजृम्भितमित्यनुमीयते, वत्सभट्टिरचिते केवलकृतौ दशपुरशासने ऋतुसंहारस्यैव सादृश्योपलम्भात् ॥

चित्रमेतद् द्रष्टव्यं यथार्वाचीनैः कविभिर्न केवलं कालिदासभावभाषाविषयाणामेवानुकरणं कृतम्, परं कालिदासप्रयुक्तं छन्दोऽपि तैः परिगृहीतम्। तथा च दूतकाव्येषु प्रायेण सर्वेष्वेव कालिदासमेघदूत इव मन्दाक्रान्ताच्छन्द एव प्रयुज्यते ॥

दूतकाव्यपरिणतिः ॥ निखिलमेव वस्तुजातमिह जगत्यां कालसहकारेण यथाकथञ्चित् परिवर्तनादिकं भजतीति सामान्यो नियमः। न चास्य व्यतिक्रमो लेशतोऽपि कश्चिद् दूतकाव्यविषयेऽनुभूयते। तथा च कालक्रमेण कालिदासानुकृतिष्वपि दूतकाव्येषु परिवर्तनादिकं पदं कृतवदेव। एतच्च दूतकाव्यगतरसविषयादिषु सर्वत्रैव समुपलभ्यते। एवं च प्राचीनेषु दूतकाव्येषु मेघपवनादीनामचेतनानामपि गतिमतां वस्तूनां दूतत्वपरिकल्पनम्। ततश्च चेतनावतामप्यविज्ञातमानवभावानां शुकचातकादीनां दूतत्वनिरूपणम्। अनन्तरं च दौत्यकर्मकुशलस्य मानुषस्यैव दूतरूपेण दयितानामन्तिके प्रेषणम् (यथोद्धवदूतादौ)। क्रमेण च भक्तिप्रभृतीनां गुणानामपि दूतत्वं संपादितं भक्तिदूतादावित्येवं दूतनिश्चयविधौ कालेन दूतकाव्यकृतां कविवराणां जनसाधारणोपयोगितया धर्ममतप्रकटनरूपाभिलाषविशेषः दूतकाव्यपरिणतिविधौ महत् साहायकं समपादयत्। अपरं च, प्राचीनेषु दूतकाव्येषु प्रधानतया विलसतो विप्रलम्भशृङ्गारस्य स्थले दूतकाव्यद्वारा शिवेतरक्षतिं सम्पादयितुकामैर्जनानां धर्मोत्कर्षं विधातुमनोभिश्च कविमुख्यैः क्रमेण शान्तस्यैव रसस्य प्राधान्यमुपपादितम्। एतस्य च सूचनमदूतकाव्येऽपि जिनसेनकृतौ पार्श्वाभ्युदये आदावुपलभामहे। मनोदूतभक्तिदूतादौ च तस्य दरीदृश्यते पूर्णा परिणतिः। तथा च क्रमेण भक्तिदूतादौ दूतकाव्यव्याजेन मानसोत्कर्षविधायकानां गुणविशेषाणामेवालोचनं कृतमित्यहो चित्रा परिणतिः शृङ्गाररसात्मकस्य शृङ्गाराङ्गीभूतदूतप्रेषणप्रधानस्य दूतकाव्यस्य ॥

एवं दूतकाव्यपरिणतिविधौ जैनकवीनां साहायकं सर्वथैवाङ्गीकर्तव्यम्। दूतकाव्यद्वारा धर्मोत्कर्षसंपादनवासना तेषामेव ग्रन्थेषु पार्श्वाभ्युदय-नेमिदूतादिषु प्रथमतः प्रकटीभवति। अपरं च, दूतकाव्यप्रणयनविधौ यन्नाम रचनापाटवं तैः

1, Classical Sanskrit Literature, p. 36.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

✓प्रदर्शितं तत् तु नितरां विस्मयपदम् । पार्श्वाभ्युदये पार्श्वनाथचरित्रोपवर्णनात्मके ✓ग्रन्थे निखिलमेव मेघदूतमन्तर्भवति समस्यापूर्तिरीत्या । नेमिदूताख्ये च नेमिनाथ-चरित्रोपवर्णनात्मके जैनकविप्रणीते दूतकाव्यान्तरे प्रतिश्लोकं मेघदूतगतप्रतिश्लोकान्तिमपाद एवान्तिमपादरूपेण प्रयुक्त इत्यनन्यसामान्यं पाटवं कविमहत्तमस्य । विषयस्य चास्य नेमिदूतश्लोकं कञ्चिदुद्धृत्य स्फुटतां विधास्यामः । तद् यथा—

प्राणित्राणप्रवणहृदयो बन्धुवर्गं समग्रं
हित्वा भोगान् सह परिजनैरुग्रसेनात्मजां च ।
श्रीमान् नेमिर्विषयविमुखो मोक्षकामश्चकार
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

अन्येषु च द्वित्रेषु जैनकाव्येष्वेषैव रीतिरनुसृतोपलभ्यते ॥

दूतकाव्यवैशिष्ट्यम् ॥ सम्यगालोचितेषु समुपलभ्यमानेषु दूतकाव्येषु प्रतिभायाद् यथा—एतेष्वधिकान्येव रामकृष्णराधाप्रभृतीनि हिन्दुपुराणोपवर्णितचरित्राणि नेमिप्रभृतीनि जैनपुराणोपवर्णितचरित्राणि चावलम्ब्यैवोपनिबद्धानि । ऐतिहासिकं काल्पनिकं वा पुरुषविशेषमालम्ब्य विरचितानीदृशकाव्यानि अल्पीयांस्येव पवनदूतादीनि समुपलब्धानि । विप्रलम्भशृङ्गार एव चैतेषु प्रायेण सर्वेष्वेषाङ्गी रसः । केवलं नेमिदूतादिषु केषुचिदर्वाचीनेषु शान्त एव रसः प्राधान्येन प्रविलसति । शृङ्गाररसस्य चादितः प्राधान्यादीदृशेषु काव्येषु, नैतच्चित्रं यथा कृष्णगोपीलीलाम् अधिकृत्यैव बहुभिरीदृशकाव्यनिर्माणप्रवृत्तिः सफलतां गमिता । वैशिष्ट्यं चैतद् दूतकाव्यगतमवधेयं यथा छन्दोऽन्तरं विहाय प्रायेण सर्वैरेव दूतकाव्यविरचकैर्मन्दाक्रान्तैव समाश्रिता । इदं च नाम छन्दो विषयाणामीदृशानामुपवर्णने परमोपयोगीति प्रयुक्तमादौ कालिदासेन । अर्वाचीनैः कविवरैरपि प्रायेण सर्वैरेव छन्दोऽन्तरमनादृत्य स्वस्वदूतकाव्यग्रन्थेष्वेतस्यैव विनियोगः कृतः, यच्च कालिदासादिभिश्चेतनानां दूतत्वमनङ्गीकृत्य अचेतना एव दूतरूपेण दयितासविधे प्रेषिताः, तदेव च वैशिष्ट्यं रामणीयकत्वमतितरामातनोति दूतकाव्यानाम् । न हि दूतत्वेन पुरुषान् चेतनाज्ञानवतोऽपि कल्पयतामर्वाचीनानां काव्यानि तथा रसिकानां चेतांसि समाकर्षुं प्रभवन्ति यथा कालिदासादीनामचेतनदूतप्रेषणविषयाणि काव्यानीति सर्व एवाङ्गीकुर्युः सुधियः ॥

दूतगन्तव्यमार्गस्योपवर्णनमपरं महद्वैशिष्ट्यं दूतकाव्यानाम्, एतद्वर्णनस्यार्वाचीनग्रन्थेषु सम्यगनङ्गीकृतत्वेऽपि । एतद्वर्णनं च भारतीयप्रदेशनगरादीनां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्राचीनसंस्थाननिर्णयोपयोगीति दूतकाव्यालोचनविषये प्रत्नतत्त्वान्वेषणदत्तमनसां विदुषां चेतः स्वत एवाभिमुखीभवति। तथा च दूतकाव्यरसादीनामास्वादनव्यग्राः प्रत्नतत्त्वानुशीलनपरा रसिका भौगोलिकवृत्तसंकलनाय द्विगुणितोत्साहाः दूतकाव्यालोचने प्रवर्तेरन्। परं विषयोऽयमिदानीमपि विदुषां दृष्टिं बाहुल्येन नाकृष्टवानिति दुःखस्थानम्। आशास्यते च दूतकाव्यगतवृत्तान्तानां सम्यगालोचने संजाते भारतीयप्राचीननगरजनपदादीनां संस्थानविषयकानि नवीनान्यज्ञातपूर्वाणि च तथ्यानि ज्ञानगोचराणि भविष्यन्तीति॥

प्रस्तुतं दूतकाव्यद्वयम्॥ अत्र प्रस्तुतयोः कीरदूतपिकदूतयोः परिचयः सामान्यतोऽस्माभिः प्रागुक्ताङ्गलनिबन्धे प्रदत्तः। ग्रन्थकारयोः कालो नातिप्राचीनः। उभयोः प्रादुर्भावो वङ्गेष्विति निश्चप्रचम्। कीरदूतस्य काचन वङ्गाक्षरमयी मातृका मिथिलामण्डले समासादितेति तस्य जनप्रियता कथञ्चिदनुमीयते। पिकदूतस्य तु न तादृशः प्रचारः परिज्ञातः। भगवतः श्रीकृष्णस्य विरहेण सुतरामार्तानां गोपीनां गोपानां च सन्देशहरणाय पिक उभयत्र दूतत्वेन कल्पितः। कीरदूते दृश्यते विषयविस्तरः, पिकदूते पुनः संक्षेपः। भौगोलिकं किमपि विवरणमेकत्रापि नायाति। दूतकाव्येषु विशेषव्यवहारं भजतो मन्दाक्रान्तावृत्तस्य परिहारोऽप्युभयत्र समानतया विहितः। कीरदूते वङ्गभाषाकवेश्चण्डीदासस्य श्रीमद्भागवतमहापुराणस्य च प्रभावो दृष्टः। अस्यान्तिमे श्लोकेऽशेषयशोभासुरस्य कालिदासोपमकविपरिषेवितस्य वङ्गावनीशस्य कस्यचिदुल्लेखः समायाति। नाम तु तस्य नोल्लिखितम्। पिकदूतकर्तुः रुद्रनाथपञ्चाननस्य प्रसिद्धनैयायिकरुद्रन्यायपञ्चाननतो भेद एव संभाव्यते। समालोचकैः कैश्चिदस्य खण्डितत्वं ख्यापितम्। मातृकायां पुष्पिकादर्शनात् न तन्मतमस्मभ्यं रोचते॥

बहोः कालादूर्ध्वमेतत्काव्यद्वयं प्रकाशमागतमिति परं प्रमोदस्थानमस्माकम्। परमकल्याणभाजनमेतत्संपादकं शुभाशीर्भिः संवर्धयामीति॥

चैत्री संक्रान्तिः,
१८८८ शाके

कालीघट्टवास्तव्यस्य
श्रीमच्चिन्ताहरणचक्रवर्तिदेवशर्मणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीरामगोपालकविकृतं

कीरदूतम्

विद्युद्गौरोज्ज्वलनिवसनं शोणपादारविन्दं
वर्होत्तंसं नवजलधरश्याममम्भोरुहाक्षम् ।
कूजद्वंशीविलसदधरं सुन्दरं स्मेरवक्त्रं
पूर्णानन्दं किमपि ललितं ज्योतिरालोकयामि ॥१

वृन्दारण्ये खगमृगकुलाह्लादशून्ये तटान्ते
भास्वत्पुत्र्या दयितविरहोत्तापसन्तापिनीनाम् ।
गोपस्त्रीणां भृतजलदृशामन्तरे दुःखिनीनां
हा हेत्युच्चैः सरुदितरवो मर्ममित् सर्वदासीत् ॥२

मध्ये तासामपि च शुशुभे तप्तकार्तस्वराङ्गी
सुश्रोणीनां[1] कमलजलदश्यामसत्कर्णिकेव ।
दीना क्षीणा सजलनयना नीरसास्यौष्ठकण्ठी
मृत्युं नैच्छद् विरहदहनोत्तापतप्ता तदा किम् ॥३

काचिद् गोपी विनयवचनैः शान्तयित्वा मृगाक्षीं
भर्तुर्वार्तागमनसुलभं जीवनं सानुमेने ।
इत्थं चिन्ताकुलितहृदया पक्षिणं कीरमारात्
प्रीत्यापश्यत् सुरसिकमनोहारिणं [2]विश्ववन्धुम् ॥४

---

१. साश्रेनीनां क २. विश्वचन्चुम् क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्यूचे तं सुमधुरगिरा प्रीणयित्वा स्मराङ्गीं
कीरास्माकं त्वमसि कुशलो दौत्यकर्मण्युतास्मिन् ।
वन्यस्त्रीणां विविधवचनं त्वन्मुखोद्गीतहृद्यं
श्रोष्यत्येव प्रमुदितमना माधवो यादवाग्र्यः[1] ॥५ ग्र्यः

गच्छ क्षिप्रं शुभमयपुरीं माधुरीं राजधानीं
यत्र श्रीमन्नटवरतनू राजते कृष्णचन्द्रः ।
आत्मानं तं मधुपुरगतं ज्ञापयोत्कण्ठिनीनां
या यावस्था वचनरचनागोचरा तामशेषाम् ॥६

उत्तिष्ठेतः परिणतफलं भुङ्क्ष्व नीरं निपीय[2]
तिष्ठंस्तिष्ठन् पथिषु गतिमिर्यास्यसि त्वं सुखेन ।
आसाद्योच्चैः सुमणिरचितं मन्दिरं माधवस्य
तत्रासीनं प्रथमवयसं द्रक्ष्यसि श्याममूर्तिम् ॥७

पश्यैकान्ते रहसि च यदा त्वां विचित्रोज्ज्वलाङ्गं
गोगोपीनां विरहमसकृत् गायमानं सुकण्ठम् ।
नेष्यत्यादौ सुललितकरे कौतुकेनातिधन्यं
वक्तव्यं तत् सुललित तदा यत्नतः प्रश्नशीले ॥८

स्वर्गप्राये वससि भुवने राजराजेश्वरोऽसि
गोपीनाथेत्यहह भणितो लज्जसे त्वं प्रकामम् ।
मा मैतत्ते श्रुतिभिरनिशं गीयते नाथ यस्मा-
दस्योच्छेदे भवति यशसो हानिरेवोच्चकैस्ते ॥९

---

१. °वाग्रः क २. निपीयं क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सायं प्रातर्निशि च सततं स्तन्यदात्री यशोदा
नव्यं गव्यं कवलविषये यत्नतः सज्जयन्ती[1] ।
त्वामप्राप्य प्रणयविकला शोकसिन्धौ निमग्ना
हा हा वत्सं [2]दवितमिव गौर्दूयते व्याकुलाङ्गी ॥१०

क्वास्ते क्वास्ते क्व मम तनयः केन नीतः कथं वा-
त्रागच्छ त्वद्वदनकमलं गव्यगन्धैः सुगन्धम् ।
चुम्बाम्यग्रे स्थितमिति मुहुर्लोकये नैषि कस्मा-
दित्युत्थाय प्रचलति पतत्युच्चकैर्वाप्तमूर्च्छा ॥११

पूर्वं बद्धस्त्वमसि ननु यद् दाममिस्तद्भिया किं
क्रोशन्त्या मे क्षणमपि पुरो नैषि कातर्यभाजः ।
यान्ति प्राणाः कथमपि न मे किं करिष्यामि हा किं
धिङ्मां धिङ्मे जननमहह त्वद्वियोगं सहामि ॥१२

भाराक्रान्तं स्तनमनुदिनं क्षीरभारेण मातु-
स्तातासह्यं पिब सकृदिदं क्रोडमागत्य मंक्षु ।
आगच्छेह द्रुतगतिपदं शीघ्रमागच्छ वत्स
त्वामित्थं साह्वयति नितरां सारितव्यग्रहस्ता ॥१३

रोदित्युच्चैः स्मरति चरितं गायति ध्यानमग्ना
तत्रस्था ये स्थिरतरुगणाः[3] सर्वदोत्साहहीनाः ।
तेऽपि क्रन्दन्त्यहह विरहात् केऽत्र संलब्धधैर्या
नास्त्येवास्मिन् व्रजपुरगृहे रोदनादन्यवार्ता ॥१४

---

१. सज्जतेषाम् क २. हसितमिव क, ख ३. °तर° क, °चर° ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्यक्तप्राणा सकृदपि बकी पाययित्वा विषाक्तं
स्तन्यं मुक्ताभवदथ भवात् सातिधन्या किमासीत् ।
माता स्तन्यं चिरमनुदिनं पाययित्वापि कस्मा-
देषा मग्ना व्यसनजलधौ नाथ कस्ते विचारः ॥१५

विच्छेदेन ज्वलितहृदयो वृश्चिकेनेव विद्धः
श्रीमान्नन्दः स विकलमनाः सर्वदा रोरवीति ।
मुञ्चत्यश्रूण्यहह सलिलानीव धाराधरोऽयं
प्रायो भूमौ लुठति भवतः प्रोच्चरन्नाम नाथ ॥१६

गोष्ठे वीथ्यां भ्रमति नियतं प्राङ्गणे शोकसन्नो-
गेहे गेहेऽपि च मृगदृशां प्राप्तुकामो मुहुस्त्वाम् ।
गच्छंस्तिष्ठन्नहह [1]स भवत्तातमुग्धः कदाचित्
स्मृत्वास्य त्वद्वदनकमलं या दशा तां न जाने ॥१७

ध्यानाप्तं त्वां सुभग तनयं मीलिताक्षः कदाचित्
क्रोडे कृत्वाधन इव निधिं गाढमालिङ्गति स्म ।
अक्रूरोऽस्यागत इति पुनः शङ्कमानस्य तस्य
तादृक्शङ्काभवदतितरां वेपथुश्चाजनिष्ट ॥१८

चिन्तामग्नः[2] प्रलपति सदा वज्रपाणे क्व यासि
क्वासि त्वं वा फणधर खल क्षान्तिमालम्बसे किम् ।
स त्यक्त्वा मां व्यसनजलधौ[3] क्वापि यातोऽपराधी
तस्माद् दण्ड्ये मयि सुतकृते यद्विधेयं विधत्स्व ॥१९

---

१. क्व ख २. °मग्ना क ३. क्वासि क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निःश्वासौघान् किरति स मुहुर्वीक्षते सर्वदाशां[1]
हा वत्साद्य स्मरसि न च मां तातमाधौ निमग्नम् ।
शोकव्याधिज्वलितहृदयो जातु जीवामि नाहं
पश्यामि त्वन्मुखमिह पुनर्नेति मूर्च्छामवाप ॥२०

पुत्रः स्निग्धो भवति पितरि स्निग्धमप्यस्य कर्म
नन्दे जातस्त्वकरुण कथं त्वाश्रयाशस्वभावः ।
एतं तातं त्यजसि सततं लालितो येन यस्त्वं
शौरेरद्य प्रथिततनयस्त्वं भवस्येष धर्मः ॥२१

प्रातर्नित्यं व्रजपुरपतेर्गेहमासाद्य मेऽहो[2]
श्रीदामाद्याः सहचरगणाः कृष्ण कृष्णेति नादैः ।
क्रोशन्तस्त्वां मुहुरतिरुषा ते वदन्ति प्रकामं
किं गोष्ठेन व्रजपतिसुत त्वं सुखी तिष्ठ गेहे ॥२२

गावोऽरण्येऽनुगमभयदं त्वां विना नैव यान्ति
घोराटव्यामघबकमुखात् कः पुनस्त्राणकर्ता ।
यावद् भीतिस्तदभिगमनं याति भीता दिगन्त
उत्तिष्ठारं[3] प्रचर पुरतो किं नु नैतच्छृणोषि ॥२३

प्रोद्यद्दावज्वलनवदनात् कालकूटाम्बुपानात्
केशिव्योमासुरवृषमुखाद् रक्षिताः स्मस्त्वयैव ।
मा मुञ्चास्मांस्त्वयि धृतमनःप्राणकानद्य नो चेद्
यास्यन्त्येव प्रथममसवस्त्वद्वियोगस्ततो नः ॥२४

---

१. सर्वदा सा क २. 'सादे मोहात् क ३. 'ष्ठावं क, ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निर्गच्छ त्वं स्मितमुखतयानन्दयन् सर्वलोकान्
गुञ्जाहारो गतिविलुलितः कण्ठशोभां तनोतु ।
पादाम्भोजे घटय विलसन्नूपुरं शृङ्गवेत्रे
कक्षे पाणौ प्रकुरु मुरलीं चावृतस्तोकवत्सैः ॥२५

उच्चैर्वेणुध्वनिभिरभितः शृङ्गनादैर्गभीरैः
शब्दैः [1]कक्षाननकरतलैः शिञ्जितैर्नूपुराणाम् ।
मित्रामोदं सुभग जनयंस्त्रासयन् वैरिवर्गान्
गोपालैस्त्वं विहर विपिने कुञ्जरेन्द्रो यथेभैः ॥२६

स्मृत्वा स्मृत्वा सुगुणचरितं माधवेत्थं वयस्याः
खेदाग्नौ ते विरहजनिते किं न दग्धा भवन्ति ।
किं वा मित्रैः परिजनगणैः किं नु पित्राथ मात्रा
यस्मात् कंसावनिपतिपुरीं सांप्रतं लब्धवांस्त्वम् ॥२७

प्रेमानन्दात्मकसुखमहो लब्धवन्तो य एते[2]
ह्यद्याकस्मादकृपविधिना वञ्चिताः स्मः किमेतत् ।
किं वाग्जालैर्व्रजपुरवने प्राणिनः प्राप्तदैन्याः
हा हा हा हा हरि हरि हरि प्राणनाथ प्रसीद ॥२८

पत्यादीनां भजनविषये रासकेलिप्रसङ्गे
या शिक्षा साश्रुतिजनमता नादृतास्माभिरेव ।
तस्य प्रीत्यै त्रिजगति भृशं हन्त हास्यास्पदं तत्
जातं संप्रत्यखिलसुधियं कीर तं ज्ञापयेति ॥२९

---

१. °कांक्षा° क, °काक्षा ख २. यतस्ते क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राधेयं ते प्रणयनिपुणा प्रेयसीनां वरिष्ठा
विक्रीतोऽस्यास्त्वमसि ललितैर्नेत्रपातैस्तदानीम् ।
सैषा दीनोपहितमरणा कृच्छ्रतस्त्वां बभाषे
तद्वाक्येऽस्मिन् क्षणमपि [1]विभो देहि कर्णानुमोदम् ॥३०

क्वाहं गोपी वत वनचरी नागरीभिर्वृतस्त्वं
क्व क्ष्माधीशे त्वयि च वचसः पाटवं लोकहास्यम् ।
श्रोतव्यं चेन्न मम वचनं दूषितं नागरीभि-
स्तत्रापीदं कुतुकविषये[2] श्रूयतां जीववन्धो ॥३१

एकः कोऽपि प्रबलपुरुषस्ताडकाजीवहारी
च्छित्त्वा[3] नासां[4] श्रुतिमपि हृतं जीवनं सूर्पणख्या ।
एकेनाहो ननु विनिहता पूतना स्तन्यदात्री
किं वा पुंसां सदयमनसां स्त्रीवधादन्यदस्ति ॥३२

विश्वं यो वै वदनकमले दर्शयन् मातुरग्रे
यावद्दामाकृत तदुदरे द्व्यङ्गुलान्नूनमेव ।
हस्तेनैकेन च बहुदिनं क्ष्माधरं प्रोद्दधार
शैलूषं तं पुरुषमबला याश्रयेत् सात्महन्त्री ॥३३

निश्चिन्तास्ता द्विजयुवतयः प्रज्ञया प्राप्तगेहा-
स्त्वां हित्वान्याः पशुपसुदृशः [5]प्राङ्मृतास्ताश्च विज्ञाः ।
मूढानां नस्त्वयि रतधियां वीक्ष्य कामप्यवस्थां
मृत्युर्दूरात् सरति कृपया त्वं कथं निर्दयोऽसि ॥३४

---

१. सखे क २. 'विषये क ३. हत्वा ख ४. नाशं क ५. प्रांहिता काव्यविज्ञाः ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गोपीनां नो हृदयनगरीं गान्दिनीजो ददाह
त्वां नीत्वेतो ज्वलितदहनेनेव लङ्कां कपीशः ।
निर्याणं ते नयनमनसोर्दुःखदं गोपयोषाः
आः क्लेशात् तापयति[1] मथुरापान्थ कान्ताकृतान्त ॥३५

काचिद् रोदित्यनिशमपरा मीलिताक्षी तथान्या
जल्पत्युच्चैर्लुठति[2] धरणौ कापि मूकाथ काचित् ।
काचित् शश्वद्विहसति भृशं काचिदुन्मत्तवेशा
केनेदं वा कृतमुत पुरं दुःखितं तन्न जाने ॥३६

काश्चिद् गोपीं दशति सततं मोहकालोरगेन्द्रो-
जाड्यं काश्चित् श्रयति नियतं काश्चिदभ्येति भीतिः ।
काश्चित् सन्तापयति नितरां प्रज्वरो भावनोत्थः
का कावस्था न भवति वनस्त्रीसभास्वत्र नाथ ॥३७

नाथो न्यस्तः पुर इव कया भर्त्सितः[3] क्रोधवाक्यैः
प्रेमोद्रेकात् श्रुत इह कया वन्दितस्त्वं कयापि ।
त्वद्भ्रान्त्याहो निरवधि कयालिङ्गितान्या वयस्या
नेत्थं लोकेऽभवदपयशो गोपिकानां तवैव ॥३८

चिन्तावायुर्वितरति भृशं वेपथुं हन्त कस्यै
गोप्यै कस्यै सुतनुकृशता श्वासहिक्के ददाति ।
कीनाशोऽयं रचयति मुदातिथ्यमग्रे च कस्यै[4]
विच्छेदात् ते कति न सुतरां व्याधयः पीडयन्ति ॥३९

---

१. काः वूलेघार्णापयति ख २. कुजत्यु° ख ३. भातिसत् ख ४. चकास्ति क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कस्याः संप्रत्यहह गरलं याति शश्वत् प्रशंसां
वह्निः कस्या वत वनलतासह्यदुःखाद्धि कस्याः ।
कस्या निन्दां सजलनलिनं चन्दनं शीतरश्मिः
प्राप्नोतीदृग् ज्वलनसमये त्वत्कृते वैपरीत्यम् ॥४०

कस्याः पाणिस्त्यजति ललितं नानिशं स्वं कपोलं[1]
पादाङ्गुष्ठेन च विलिखिता भूमिरेवाथ कस्याः ।
कस्याश्चेतो भ्रमति नियतं चक्रवत् कुम्भकर्तु-
स्त्रायस्वेदं प्रिय करुणया गोकुलं व्यस्तरूपम् ॥४१

कस्यां मूर्तिः स्फुरति तव यन्नामसंकीर्तनं[2] च
प्रत्यासन्ने मरण इति तत् सद्भिरुद्गीयते सत् ।
कस्यां गोप्यामजनि च भवद्भाव उच्चैरपूर्वो
वृन्दारण्ये कति युवतयः किं न कुर्वन्ति मोहात् ॥४२

हित्वा गोपीश्चिरमजित संमुक्तकामा भवान् या
नव्या भव्या भजति मथुरानागरीस्तास्त्वदर्हाः ।
वैदग्ध्यं ते जगति विदितं कुब्जिकासंगमेन
त्यक्त्वा पद्मं श्रयति बदरीपुष्पमिन्दिन्दिरः कः ॥४३ large bee

विच्छेदात् ते यदतिकदनं[3] गण्यते किं मया तत्
संलापस्ते पुरवनितया सार्धमार्तिप्रदो नः ।
यादृक्कुब्जारतिसुखसमाजस्तु मर्म च्छिनत्ति
तादृक् कश्चिन्न हि [न हि] भवेत् किं करोमि क्व यामि ॥४४

---

१. नालिसं संकमोलं ख २. तरयत्वामसं° क ३. °कमलं ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विख्यातो यो बहुदिनमभू राधिकाप्राणनाथः
स त्वं कुब्जापतिरिति हठाल्लब्धवान् ख्यातिमुच्चैः ।
भीतिर्लज्जा क्व च तव जनश्रुत्यतीतं चरित्रं
या काचिद् वा भवतु सुखदा वञ्चितेयं वराकी ॥४५

नानारत्नच्छुरितकनकोद्दीप्तपर्यङ्कसुप्तं
नागर्यस्त्वां कुसुमसुकुमाराङ्ग[1] मुग्धा भजन्तु[2] ।
किं त्वासां तत्सुकठिनकुचाघातभिन्नं दुनोति
त्वद्गात्रं मां स्मितमुखविलोकेन कस्यास्ति संज्ञा ॥४६

आबाल्यान्मे नयनमितरं नाध्यपश्यद्विना त्वा-
मन्यां वार्तां श्रुतिरियमृते[3] नाशृणोत् त्वत्कथां भोः ।
ध्यानं नान्यन्नवजलधरश्याममूर्तिं विनासीद्
भक्तिर्नान्या त्वयि पुरगते केन जीवामि हाद्य ॥४७

मथुरा

यद् गोपीनां करकिशलयैर्लालितं श्रीविलासं
त्वत्पादाब्जं ललितमधुना पुःस्त्रियः संश्रयन्ति ।
किं तेपुस्तास्तप इह भवे येन सम्यग् वशास्त्व-
मस्माकं किं भवति विमुखे गन्धवाहोऽपि वामः ॥४८

नायासि त्वं यदि यदुपते गोकुलं कौतुकाय
गत्वा पश्याम्यमलचरणं तत्र ते नापि चाज्ञा ।
वक्तव्यो मय्यपि करुणया जीवनोपाय आशु
त्यक्ते प्राणे भवति विफलः सत्कृतेर्नानुबन्धः ॥४९

---

१. कुसुमकुसुमारा° ख　२. भवन्तु क　३. श्रुतिरपि क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रख्यातेऽस्मिन् सुविमलकुले दुर्यशोऽङ्का पताका
जातेवाहं यदुवर यथा श्यामरेखेन्दुबिम्बे ।
दुर्वादो मे भवतु भुवने निर्भरो मर्षये[1] तं
ज्ञात्वैवं मां स्मरसि न मनागप्यहो त्वं त्वदीयाम् ॥५०

त्यक्तं गेहं कुलमतिधनं[2] दुस्त्यजं चापि लोकै-
रार्याचारो न च विगणितस्त्वत्पदप्राप्तिहेतोः ।
प्रेम्णा वद्धाप्यनिशमधुना चिन्तये त्वत्पदाब्जं
तत्रापि त्वं त्यजसि किमिदं मामनाथामनन्त ॥५१

किं वाग्दोषात् पशुपवनितानादराद् वा मुधैव
क्रोधस्तेऽयं प्रिय हि दयितं प्राप्य वै सन्निकर्षे ।
का नारी किं विलपति न वा सौभगर्द्धे यदित्थं
जातं चागो मम तु कृपया क्षन्तुमर्हस्यधीश ॥५२

त्वत्प्रस्थानावधि यदुपते नैति निद्रा क्षुधा वा
तृष्णा वा पीडयति न च मामन्यचिन्ताकथा का ।
या ह्यालोकानलखरशिखा[3] ते मदन्तःप्रविष्टा
सा दुर्धर्षा ज्वलति सततं पद्मनेत्र क्व शान्तिः ॥५३

शून्यं जातं मलयजगृहं ह्यत्र निष्पत्रमेवा-
रण्यं निष्पङ्कजमपि सरः पङ्कजन्माकरो यत् ।
यद्यद्वस्तु ज्वलनशमनं सेवितं शीतवीर्यं
तत्तत् सर्वं तपति सुभृशं पद्मनाभ क्व शान्तिः ॥५४

---

१. °ष्वालयं त्वामने क २. धनमति° ख ३. यद्या° ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राधा राधेत्यनिशममलं वेणुगीतं तवासी-
चेतो हर्तुं वडिशमिव किं मीनरूपं ममेदम् ।
दासोऽस्म्येतच्चटुलवचनं[1] क्वाद्य नाहं शृणोमि
क्व त्वं क्वाहं क्व च परिचयो विस्मृतः किं समस्तः ॥५५

द्वारोपान्ते वनभुवि सरित्तीरभूमीरुहाग्रे
मत्प्रेक्षार्थी व्रजसि तपनोत्तप्तभूमावपि त्वम् ।
क्वेदानीं सा प्रणतिरसकृत् प्राप्य मां दैवयोगात्
कम्पस्वेदान्विततनुरभूः क्वाद्य ते काकुवादः ॥५६

यादृग् वंशीसुमधुररवः कर्णरन्ध्रे प्रविष्ट-
श्चेतोऽस्माकं तरलमकृताद्यापि न स्थैर्यमाप[2] ।
मन्ये तादृङ् नगरललनाकण्ठवीणाध्वनिस्तत्
कृत्वा चित्तं तव तरलितं हन्त नास्मारयन्नः ॥५७

यावद् वंशी भुजगवनिता सादशन्मामकस्मा-[3]
दङ्गं तावद् विषमगरलज्वालया जीर्णमेतत् ।
व्यालग्राही यदि पुनरिहागत्य स स्वीयमन्त्रै-
र्दुर्भाग्यायाः शमयति विषं तत्तदा शान्तिरेव ॥५८

ईषद्धास्याञ्चितशशिमुखं कुण्डलोद्दीप्तगण्डं
राजन्मुक्तारुचिरसुनसं[4] बन्धुजीवाधरोष्ठम् ।
तिर्यग्दीनातरलनयनं[5] कुञ्चितभ्रूविलासं
भ्राजद्भृङ्गोत्पलपरिलसत् कर्णयुग्मं सुभालम् ॥५९

Krishna's nose pearl

१. दासस्येत° क, दासे सेति ख २. °मापि ख ३. दशम्या° क ४. सुलसं क, सुनिशं ख
५. °लीना° ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुञ्जोत्तंसं विचलदलकं पिच्छपुच्छावचूडं
मेघश्यामं तरुणवयसं स्रग्विनं पीतवस्त्रम् ।
क्रीडाक्रान्तत्रिजगदतनूदर्पभङ्गत्रिभङ्गं
दृष्ट्वाहं त्वां चकर हृदयं हन्त निर्मञ्छुनं ते ॥६०
॥ युग्मकम् ॥

कूले पद्मप्रणयिदुहितुर्नीपमूले यदाहो
प्रत्यग्रस्त्वं स्मर इव हठाद् दृष्टिकोणं गतो मे ।
चित्तं नेत्राञ्चलगतिशरैर्भ्रूधनुर्निःसृतैस्ते
विद्धं सद्यो मदनकदनादङ्गमुत्कम्पमाप ॥६१

मारोन्मादं नवघनरुचं द्रष्टुमीहा भवन्तं
प्रेमौत्कण्ठ्याद् भृशमनुदिनं वर्धमाना बभूव ।
तृप्तिर्नासीन्मुखशशिसुधां जातु दृग्भिः पिबन्त्या-
स्तां मे जातः शशिनि मृगवत् श्यामवादस्तदोच्चैः ॥६२

सानन्दाङ्गीं सभयचकितां कुत्रचित् कुञ्जमध्ये
हन्तासंसाधितरतिकलां मामवाप्य प्रयत्नात् ।
कौमारं मेऽहरदनुनयैः काकुवादैस्तथोच्चै-
र्यस्तां सोऽद्य स्मरति न कथं नागरीमध्यवर्तीं ॥६३

सद्गन्धाढ्यं विविधकुसुमस्रङ्मयं मे त्वदर्थं
सौम्यागारे मनसिजसुखोत्पत्तितल्पं विधात्र्याः ।
ध्यायन्त्यास्त्वां जनितरतिरङ्गोत्सवं चोद्वहन्त्याः
या चित्राभूदहह रजनी नाधुनासङ्गते सा[1] ॥६४

---

१. सङ्गनायां गतेषा ख ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायातस्त्वं कथितसमये मञ्जुलं वासगेहं
भङ्गोत्साहैर्न कृत उ तदा हन्त को वा विलापः ।
जम्बालाक्तं लुठितमवनौ पङ्किलायामुदस्रै-
रङ्गं जातं[1] कथमपि मया यामिनी सा विनीता ॥६५

रङ्गद्वारेऽनिलगतिनिरोधे गृहेऽस्पन्दमङ्गं
तन्मध्ये ते समितशरणं विद्यते जीवनं मे ।
चित्रं तत्राप्यतनुविशिखैर्जर्जरीभूतमुच्चैः
स्थानत्यागाच्छुभमिति तदा नाकरोद्धा हतोऽस्मि ॥६६

वासे तस्मिंस्त्वयि तु विमुखे स्वेषुतल्पे मनोजो-
निर्भिन्नाङ्गीं रचितकुसुमेऽशाययत्तच्छुरैर्माम् ।
वाणव्रातव्रणितहृदयां त्यक्तवेशां रुदन्तीं
मूर्च्छापन्नामपि स दलितुं[2] नाशकत् क्रूरकर्मा ॥६७

वन्या दूतीव तव मुरली सा यदाहो जगर्ज
त्यक्त्वावासं गुरुजनमपि क्वापि संकेतदेशे ।
त्वामुद्दिश्य त्वदभिसरणा तत्क्षणे निर्गताहं
प्रत्यादिष्टा गृहपरिजनैर्जातु नालोकयेऽपि ॥६८

तामिस्रालङ्कितवनपथं[3] ह्यम्बरं मेघजालै-
र्व्याप्तं चण्डानिलमविरतं बद्धशीलाभ्रनादम् ।
वज्राघातं विपिनजकुलैर्घोरशब्दं रजन्यां
वीक्ष्यैवं किं शिव शिव तदा नाभिसारं गताहम् ॥६९

---

१. रङ्गाजातं क २. मुदनितुं ख ३. ताताञ्चाम्रचितिवलरथं क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बाला तन्वी कुसुमसुकुमार्यस्वतन्त्रा वधूटी
साहं प्रीत्या सुजन रजनीचारिणीव प्रगल्भा[1] ।
ध्वान्तारण्ये विगलितभया क्वापि नक्तं चरामि
क्व प्राणेशः क्व च स समयः प्रीतिरन्तश्छिनत्ति ॥७०

त्वत्संज्ञप्त्या[2] जनितपरमाह्लादपूर्णं मदङ्गं
गन्तुं वीथ्यामवशमपतच्छ्वश्वदुर्व्यां तु तस्याम्[3] ।
कृच्छ्रेणाहं पुनरपि सखीमावलम्ब्याल्पगत्या
कुञ्जं प्राप्याप्यहह न शठ त्वामवेक्षे[4] तदानीम् ॥७१

नीत्वा रात्रिं कथमपि वने बाणभिन्ना स्मरस्य
प्रातः पादाञ्चलनिपतितं त्वां च भावालसाङ्गम् ।
निर्भर्त्स्यार्हं विविधविनयाद् भाषमाणं रुषोच्चै-
र्यत्प्रावोचं परुषवचनं तत् किमेतन्निदानम्[5] ॥७२

पादालक्तैररुणहृदयं पाणिजैर्विद्धगात्रं
दन्ताघातैः क्षतसदधरं कामिनीनामवेक्ष्य ।
चिह्नैरेतैरपि च कृतकोद्भापिणि त्वय्यधीशे
निक्षिप्तं यद्वचनकुलिशं तत्तु नो विस्मृतं भोः ॥७३

यत्नैः पादं स्वशिरसि करेणार्पयन्तं भवन्तं
नाहं पादाहतिमिरसकृत् प्राक्षिपं सागसं किम् ।
प्राणाधीशे त्वयि सुपुरुषे यत्कृतं कोपमोहा-
त्तद्दौरात्म्यं हृदयदलनं नाथ नाद्य स्मरामि ॥७४

---

१. प्रगन्ता क, प्रगण्डा ख २. °ज्ञप्त्युज्जलित° क, °ज्ञप्तानितपवनहा° ख ३. सु तस्यां क, सुरम्यम् ख ४. त्वामपङ्के ५. °न्नियाय क, °द्विना य ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भग्नोत्साहे त्वयि गतवति प्राणनाथे निकुञ्जात्
कोपिन्या मे सपदि विरहोद्दामवह्निस्फुलिङ्गः ।
मन्दाङ्गाया हृदयकुहरे प्राविशत् कर्मदोषान्-
निर्याणात्ते व्रजवनपुरात् सोऽद्य जाज्वल्यमानः ॥७५

शान्तासूयां त्वदनुसरणं चिन्तयन्तीं चरित्रं
भिन्नां मीनध्वजशरचयैस्तीव्रतप्तां दिनान्ते ।
मामभ्येत्य स्मरसि भवताकारि यः काकुवादः
स्मृत्वा स्मृत्वा तमिह हृदयं दीर्यते किं बहूक्त्या ॥७६

त्यक्त्वा मन्युं परमदयितं माधवं पादमूले
राधे तूर्णं भज करुणया पश्यसि त्वं न चैनम्[1] ।
इत्युज्जल्पद्युवतिसभया शिक्षिताः कुञ्जकीरा-
स्तद्वाक्शल्यैरहह खलु मां सर्वदोद्वेजयन्ति ॥७७

दग्धस्वान्तां मदनशिखिना मां बहिर्मानिनीं त्वं
मानं प्रोत्सारयितुमसकृत् प्रा[णमो][2] यत्नपूर्वम् ।
किञ्चित् तत्राप्यहह भणितं तं तु धिक् स्त्रीस्वभावं
मिथ्यामानादपि च न गता शर्वरी सा विरामम् ॥७८

स्निग्धे यत् त्वय्यपि सुपरुषा रागिणि द्वेषसंस्था
स्तब्धैवाहं नमति विमुखी त्वन्मुखे जीवबन्धो[3] ।
युक्तं तन्मे सततमधुना वैपरीत्यं चरन्त्या
इन्दुर्मन्दानिल इह विषं केसरं चन्दनं च ॥७९

---

१. न चैव क २. प्राणुरी क, प्राणुवी ख ३. इतः परं पंक्तिचतुष्टयं खमातृकायां नास्ति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्निग्धे यत् त्वय्यपि सुपरुषा रागिणि द्वेषसंस्था
स्तब्धैवाहं नमति विमुखी त्वन्मुखे जीववन्धो ।
तद्वैयात्याचरणमपि[1] मे स्मर्तुमद्याप्ययोग्यं
कः कामी कां त्यजति सुभगां मानिनीं रत्यभिज्ञाम् ॥८०

उत्कण्ठार्तिस्त्वदनुगमना घोरकान्तार ए[का]
ध्यायन्त्येकं त्वदनुचरितं संभ्रमादुद्भ्रमन्ती ।
नासूयेऽहं विदितमपि भो वल्लभं त्वां वहूनां
त्यक्त्वा दोषांस्तव तु[2] नितरां दूरतः संगतास्मि ॥८१

क्व प्राणेशः क्व नु स च गतः केन वा चित्तहर्ता
नायाहीति प्रवचनमिहाभापते कर्णसौख्यम् ।
सख्येतन्मे हृदयमदयं तं विना दीर्यतेऽद्य
प्रोक्त्वैवेत्थं वनभुवि तदा मूर्च्छिताहं पपात ॥८२

प्राणाधीशं कुवलयदलश्यामविस्तीर्णदृष्टिं
सुस्मेरास्यं तरलचरणं तं च सख्यानयेथाः ।
इत्याभाष्य प्रियसहचरीं तत्पुरस्त्वत्समीपे
प्रोत्कण्ठार्ता स्वयमनुगता का च लज्जा क्व मानः ॥८३

यत्नैर्वद्धाञ्जलिरपि तृणं हन्त धृत्वाथ दन्ते
कण्ठे दाम प्रणतिभिरियं त्वत्पदाब्जे प्रपन्ना ।
दत्त्वालोकं कमलनयनारक्ष जीवं त्वमस्या
इत्थं सख्या वचनमसकृन्नादृतं[3] तत् त्वयालम् ॥८४

---

१. °जात्या° क, °जं त्वा° ख २. °दनु ख ३. °त्वादूतं क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रेमोल्लासैरलसगमना क्वापि सङ्केतदेशे
मन्दं मन्दं पदविहरणेनावलम्ब्याहमालीम् ।
कुञ्जेऽरण्येऽगममसुपतिं त्वामदृष्ट्वा च दैवा-
द्विच्छेदोत्थो ज्वर इव मयि प्रादुरासीत् समग्रः ॥८५

अद्यारण्ये यदि न मिलितो माधवो दैवयोगात्
किं वस्तव्यं वद सखि वनाभ्यन्तरे व्यर्थमेव ।
प्राणा यास्यन्त्यहह विरहात् किं तवाश्वासवाक्यै-
रित्यालप्याहमिव कुररी रोदने संप्रवृत्ता[1] ॥८६

किं वा बद्धः परिजनगणैरावृतः कर्मयोगात्
किंवाजातस्मृतिरथ वने भ्राम्यति ध्वान्तपुञ्जे ।
यन्नायातः सखि स दयितो मञ्जुसङ्केतकुञ्जे
तन्मन्ये वा भजति[2] शठतामित्यहं स्यां विषण्णा ॥८७

कुञ्जे कूजन्मधुकरपिकाद्युत्सवाढ्ये मनोज्ञे
तत्रासीनां मुदितहृदयां मां च सङ्केतपूर्वम् ।
त्यक्त्वा वस्तुं त्वमरमसरः सुन्दरीभिः प्रियाभि-
र्ह्येकाकिन्या ननु विधुरया तत्र रात्रिः प्रणीता ॥८८

गुञ्जन्मत्तभ्रमरविलसन्माधवीवल्लिकुञ्जे
नानापुष्पारचितशयने त्वं वसन् मामपश्यः ।
शिञ्जामञ्जुप्रचलिततुलाकोटिराजत्पदाब्जा[3]-
मङ्गे तेऽभ्यागमनजमुदो नो ममुर्मे तदोच्चैः ॥८९

---

१. सं पिवन्ती क २. तस्मान्मन्ये त्य° क ३. शिञ्जन्मञ्जुप्रलुलितुलुठा° क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लज्जाशीलां नमितवदनां चञ्चलाक्षीमुपेत्य
त्वं मामुच्चैरनुनयशतैस्तल्पमभ्यापयस्तत् ।
ईषद्धास्याञ्चितमुखविधुं मामकं चुम्बतालं
शैथिल्यं नो जघनवसने न त्वयाकारि शीघ्रम् ॥९०

बद्धा दोर्भ्यामधरपुटवक्षोरुहौ मारमत्तो
दन्ताघातेन च नखनिपातेन भिन्नौ चकर्थ ।
प्रारब्धे संकुलरतिरणे नूपुराद्युच्चनादैः
सद्यः पूर्णं गगनमभवत् क्ष्माधरश्चञ्चलश्च ॥९१

जेतुं कान्तं रतिरणवुधं त्वामहं संप्रवृत्ता
दोःपाशास्त्रैर्नखपरशुभिस्तीक्ष्णदन्ताग्रशूलैः ।
कृत्वा मुग्धं स्मरसि शयनेऽशायय मङ्क्षु वेगात्
काञ्च्यादीनामथ जयरवस्तत्र तूर्यैर्बभूव ॥९२

लुप्तं वेशं विरचय तनौ वह्निशुद्धं दुकूलं
क्रीडोत्क्षिप्तं घटय जघने[1] रत्नकाञ्चीं च पादे ।
मञ्जीरं मे कुरु सुललितं त्वामहं चेत्यवोचं
प्रोक्तं यद्यन्मुरहर मया तत्तदेवाकरोस्त्वम् ॥९३

याते गेहात् त्वयि [2]वनभुवं नाथ गोचारणाया-
पश्यन्त्या मे क्षणमिव युगं त्वां [3]हृदीशं तदासीत् ।
वासोयुग्मं मलिनमवहं त्यक्तभूषाश्रुपूर्णा
ध्यायन्ती त्वन्मुखसरसिजं यावदभ्यागमस्ते ॥९४

---

१. जघनं ख २. °भुवां क ३. हृदंशे क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृन्दाटव्यां पुनरपि सखे रासचक्रे भवन्तं
नानावाद्यैर्व्रजयुवतिभिः सार्धमुच्चैर्नटन्तम् ।
किं पश्यामि प्रियतम कदा नाम सङ्केतवंशी-
गीतैश्चेतो[1] मम तरलतां प्रापयिष्यस्यनल्पाम् ॥९५

कान्तं पाण्युद्धृतगिरिवरं शक्रदर्पान्तकं त्वां
सुस्मेरास्यं जलजनयनं श्यामलाङ्गं स्मरामि ।
कूले रम्ये मिहिरदुहितुस्तूर्मिवार्यर्चितं[2] ते
पादाब्जं किं तृणमृगनुगं लोकयिष्याम्यदूरे ॥९६

यमुना

मध्ये भानोर्दुहितुरमलेन्दीवराब्जाद्यरण्ये
त्वां घोराहेः शिरसि च मुहुर्नृत्यशीलं सुशोभम् ।
बर्होत्तंसं नटवरतनुं स्रग्विभूषं मनोज्ञं
मत्प्राणेशं सततमहमुद्भावये भावितात्मा ॥९७

यदयेकान्तं मयि तु करुणां नो विधास्यस्यतोऽहं
कृत्वा छन्नं किल शशिमुखं भस्मना तूर्णमेव ।
संप्राप्याशोभितमधुपुरीं योगिनीयुक्तवेशा
द्रक्ष्यामि त्वां प्रिय पथिचरं प्राचरन्ती च भिक्षाम् ॥९८

किं वा तासां नगरसुदृशां पादसेवादिभिस्ताः
सुश्रूषाभिर्बहुभिरनिशं प्रीणयित्वा यथावत् ।
ताभिः सार्धं त्वहमनुचरी त्वामवाप्याथ हर्षात्
त्वत्सौन्दर्यामृतरसचयं लोचनाभ्यां पिबेयम् ॥९९

---

१. शीतै° क २. °तुर्मिवावर्चितं क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नाहं वत्स्याम्यलमिह गृहे नाहमन्यान्तिके वा
यास्यामीतो वत कृतजटा त्वङ्निचोला वनान्ते ।
यद् गोपीनां स्तनमृगमदाद्यर्चितं पादपद्मं
संचिन्त्यालं हृदयकुहरे जीवनं धारयामि ॥१००

काहं को वा मम तु दयितो नैव किञ्चित् स्मरामि
ह्येकः कोऽपि स्फुरति हृदये श्यामलाङ्गोऽग्निरूपः ।
कस्माद्धेतोर्दहति स च मां निर्दयः किं करोमी-
त्युक्त्वा भूमौ न्यपतदिव सा विस्मृतस्पन्दनाङ्गी[1] ॥१०१

इत्थं सर्वं विरहचरितं वाक्यमाभाष्य कीरं
श्रीराधायाः प्रियसहचरी दूतमप्रेषयत् तम् ।
कृष्णायावेदयितुमपि तां दुर्दशां तत्प्रियाया
अत्यौत्कण्ठ्याज्झटिति मथुरानागराय प्रियाय ॥१०२ कृष्णाय

कीरो धीरः सुहृदुप[न]तो दौत्यकर्मैकदक्षः
वृन्दारण्याद् व्यथितहृदयो व्यस्तरूपः प्रतस्थे ।
[गत्वा तार्क्ष्यप्रतिमतरसा राजधानीं यदूनां
श्रीगोविन्दं रहसि विदिताशेषवृत्तं व्यधत्त][2] ॥१०३

राधादेवीविरहसहितोपेन्द्रलीलारहस्यं
स्वाङ्गेनेदं कृतमपि मया कीरदूताख्यकाव्यम् ।
तद्भृत्यात्मप्रभवकविना रामगोपालकेन
प्रेमोद्यानामृतमिव सदा सन्त आस्वादयन्तु ॥१०४

---

१. लपितदिवसा संमूर्तं मन्दकाञ्ची ख, संसृता° क

२. अस्य श्लोकस्याद्यो भागः कपुस्तिकायां नास्ति, अन्यस्तु नैकत्रापि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दोर्दण्डेन वशीकृताः क्षितिभुजो यस्येह वङ्गावनौ
यस्याशेषगुणप्रदीप्तयशसा प्रच्छादितं क्ष्मातलम् ।
वर्तन्ते परिषत्सु यस्य कवयः श्रीकालिदासोपमाः
काव्यं कीरवचोहरं वितनुते तस्यैव सभ्यो बुधः ॥१०५

॥ इति श्रीमद्रामगोपालकविकृतं कीरदूताख्यं काव्यं समाप्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्लोकसूची

[संख्या श्लोकाङ्कसूचिका]

अद्यारण्ये यदि न मिलितः	८६	गच्छ क्षिप्रं शुभमयपुरीम्	६
आ बाल्यान्मे नयनमितरम्	४७	गावोऽरण्येऽनुगमभयदम्	२३
इत्थं सर्वं विरहचरितम्	१०२	गुञ्जन्मत्तभ्रमरविलसन्-	८९
ईषद्धास्याञ्चितशशिमुखम्	५९	गुञ्जोत्तंसं विचलदलकम्	६०
उच्चैर्वेणुध्वनिभिरभितः	२६	गोपीनां नो हृदयनगरीम्	३५
उत्कण्ठार्तिस्तदनुगमना	८१	गोष्ठे वीथ्यां भ्रमति नियतम्	१७
उत्तिष्ठेतः परिणतफलम्	७	चिन्तामग्नः प्रलपति सदा	१९
एकः कोऽपि प्रबलपुरुषः	३२	चिन्तावायुर्वितरति भृशम्	३९
कस्यां मूर्तिः स्फुरति तव यत्	४२	जेतुं कान्तं रतिरणबुधम्	९२
कस्याः पाणिस्तजति ललितम्	४१	तामिस्रालङ्कितवनपथम्	६९
कस्याः सम्प्रत्यहह गरलम्	४०	त्यक्तप्राणा सकृदपि बकी	१५
काचिद् गोपी विनयवचनैः	४	त्यक्तं गेहं कुलमतिधनम्	५१
काचिद् रोदित्यनिशमपरा	३६	त्यक्त्वा मन्युं परमदयितम्	७७
काञ्चिद् गोपीं दशति सततम्	३७	त्वत्प्रस्थानावधि यदुपते	५३
कान्तं पाण्युद्धृतगिरिवरम	९६	त्वत्संज्ञप्त्या जनितपरमा-	७१
काहं को वा मम तु दयितः	१०१	दग्धस्वान्तां मदनशिखिना	७८
किं वाग्दोषात् पशुपवनिता-	५२	दोर्दण्डेन वशीकृताः क्षिति-	१०५
किं वा तासां नगरसुदृशाम्	९९	द्वारोपान्ते वनभुवि सरित्-	५६
किं वा बद्धः परिजनगणैः	८७	ध्यानाप्तं त्वां सुभग तनयम्	१८
कीरो धीरः सुहृदुपनतः	१०३	नाथो न्यस्तः पुर इव कया	३८
कुञ्जे कूजन्मधुकरपिका-	८८	नानारत्नच्छुरितकनको-	४६
कूले पद्मप्रणयिदुहितुः	६१	नायातस्त्वं कथितसमये	६५
क्व प्राणेश क्व नु स च गतः	८२	नायासि त्वं यदि यदुपते	४९
क्वास्ते क्वास्ते क्व मम तनयः	११	नाहं वत्स्याम्यलमिह गृहे	१००
क्वाहं गोपी बत वनचरी	३१	निर्गच्छ त्वं स्मितमुखतया	२५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निश्चिन्तास्ता द्विजयुवतयः ३४
निःश्वासौघान् किरति स मुहुः २०
नीत्वा रात्रिं कथमपि वने ७२
पत्यादीनां भजनविषये २९
पश्यैकान्ते रहसि च यदा ८
पादालक्तैररुणहृदयम् ७३
पुत्रः स्निग्धो भवति पितरि २१
पूर्वं बद्धस्त्वमसि ननु यद् १२
प्रख्यातेऽस्मिन् सुविमलकुले ५०
प्रत्यूचे तं सुमधुरगिरा ५
प्रातर्नित्यं व्रजपुरपतेः २२
प्राणाधीशं कुवलयदल- ८३
प्रेमानन्दात्मकसुखमहो २८
प्रेमोल्लासैरलसगमना ८५
प्रोद्यद्दावज्वलनवदनात् २४
बद्धा दोर्भ्यामधरपुटव- ९१
बाला तन्वी कुसुमसुकुमा- ७०
भग्नोत्साहे त्वयि गतवति ७५
भाराक्रान्तं स्तनमनुदिनम् १३
मध्ये तासामपि च शुशुभे ३
मध्ये भानोर्दुहितुरमले- ९७
मारोन्मादं नवघनरुचम् ६२
यत्नैर्बद्धाञ्जलिरपि तृणम् ८४
यत्नैः पादं स्वशिरसि ७४
यद् गोपीनां करकिशलयैः ४८
यद्येकान्तं मयि तु करुणाम् ९८
याते गेहात् त्वयि वनभुवम् ९४
यादृग्वंशीसुमधुररवः ५७
यावद् वंशी भुजगवनिता ५८
रङ्गद्वारेऽनिलगतिनिरो- ६६
राधादेवीविरहसहितो- १०४
राधा राधेत्यनिशममलम् ५५
राधेयं ते प्रणयनिपुणा ३०
रोदित्युच्चैः स्मरति चरितम १४
लज्जाशीलां नमितवदनाम् ९०
लुप्तं वेशं विरचय तनौ ९३
वन्या दूतीव तव मुरली ६८
वासे तस्मिंस्त्वयि तु विमुखे ६७
विख्यातो यो बहुदिनमभू- ४५
विच्छेदान्ते यदतिकदनम् ४४
विच्छेदेन ज्वलितहृदयः १६
विद्युद्गौरोज्ज्वलनिवसनम् १
विश्वं यो वै वदनकमले ३३
वृन्दाटव्यां पुनरपि सखे ९५
वृन्दारण्ये खगमृगकुला- २
शान्तासूयां त्वदनुसरणम् ७६
शून्यं जातं मलयजगृहम् ५४
सद्गन्धाढ्यं विविधकुसुम- ६४
सानन्दाङ्गीं सभयचकिताम् ६३
सायं प्रातर्निशि च सततम् १०
स्निग्धे यत् त्वय्यपि सुपरुषा ७९,८०
स्मृत्वा स्मृत्वा सुगुणचरितम् २७
स्वर्गप्राये वससि भुवने ९
हित्वा गोपीश्चिरमजित सं- ४३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पिकदूतम्

श्रीनाथे मथुरां गते व्रजपुरात्तच्छोकदावानलै-
दग्धा गोपवराङ्गना हररिपोर्वाणैः [1]समुत्पीडिता ।
कृष्णप्रापणलिप्सया सुविपिनं हन्त भ्रमन्ती तदा
शुश्रावेन्दुमुखी वनप्रियरवं राधा कुरङ्गेक्षणा[2] ॥१

तस्मिंस्तन्निनदेन कामजनकेनामोहिता कोकिलं
भ्रान्त्योन्मत्ततमा जगाद सुमुखी शश्वत् [4]सनीरेक्षणा ।
गोपीनां हितहेतवे मधुपुरीं गत्वा ममैतद्वचो
वक्तुं नाथपदारविन्दयुगले दूतोऽस्मदीयो भव ॥२

आसीदत्र हरिर्यदा तव वचश्चानन्यचित्तस्तदा[5]
गोपीबन्धुरशुश्रुवत् परभृतानन्देन नन्दात्मजः ।
तस्मात्त्वां मथुरापुरीं गतवतो दामोदरस्यान्तिके
दौत्यं कर्तुमहं वदामि विनयैः पीताम्बराकाङ्क्षिणी ॥३

सर्वास्वेव सभासु कोकिल भवान् वक्ता यतस्त्वद्वचः
श्रुत्वा सर्वनृणां मनोऽपि रमते त्वं चापि लोकप्रियः ।
तस्माच्छ्रुद्दटेति वच्मि मथुरां कान्तार्थिनी कातरा
युक्तं सर्वगुणान्वितस्य विदुषो दूतस्य संप्रेरणम् ॥४

---

१. समाकुलिता क २. राधा चञ्चललोचना पिकरवं शुश्राव चन्द्रानना ख ३. कुरङ्गाक्षिणी क
४. सनीराक्षिणी क ५. °श्चालम्ब्य° क ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तिष्ठन्त्येव हि दौत्यकर्मणि रता अन्ये द्विरेफादयः
किन्त्वस्माभिरिमे हरेर्निकटतो न प्रेषणीयाः क्वचित् ।
ते यस्मान्मधुलोभिनो मधुरिपोः [1]प्राप्याङ्घ्रिपद्मं ततो
नो चेत्तन्मधुलोभतो मधुपुरादायायुरस्मिन् पुनः ॥५

चेतस्तत्र समीरितं [2]यदुपतेरासाद्य पादाम्बुजं
तस्मिन्नेव विराजते[3] पिक मुदा तस्मात् पुनर्नागतम् ।
तत् कं वच्मि हि गच्छ गच्छ मथुरामन्यं मुहुस्त्वां विना
को वास्ति व्रजयोषितां मनसिजां वाञ्छां समापूरयेत् ॥६

कृष्ण दैत्यारेर्विरहानलः परतरो दावानलो वाभवद्
गोपीनां नयनाश्रुपङ्क्तिरधुना [4]नो वृष्टिरेवाभवत् ।
कालोऽयं मम दुर्विपाकवशतः कल्पान्तकालोऽभवन्-
मन्ये संहरणाय कोकिल हरिर्नो रुद्ररूपोऽभवत् ॥७

यस्मै जीवनयौवनं विनिहितं सन्त्यज्य कौलीन्यकं
सोऽप्यस्मान् विरहार्णवे बत हरिर्निक्षिप्य दूरं गतः ।
एतन्माधवचेष्टितं[5] बहुविधं दुःखादिकं त्वामृते
कस्मै वा कथयामि गोकुलपुरे को वा पुनः श्रोष्यति ॥८

अस्माकं हरये निवेद्य सहसा दुःखं पुनर्वैरहं
तं चानीय जनार्दनं मधुपुराद् गोपाङ्गनाजीवनम् ।
चन्द्रास्यं बत मञ्जुकुञ्जविपिने वृन्दावने त्वं सकृद्
उद्धारं कुरु नो वनप्रिय सखे नाथस्य शोकार्णवात् ॥९

---

१ प्राप्ता° ख, °पाद क २ जदु° क,ख ३ जिते क ४ नावृष्टि क ५ माधुर° क, माधम° ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रस्थानेन भविष्यति प्रिय सखे मत्कार्यसम्पादनं
तत्पुर्यां गमनोद्यतस्य[1] भविता ते कृष्णसन्दर्शनम् ।
तस्मात्त्वं निजकार्यतो मधुपुरीं गच्छन्मदीयं मनाक्
कर्त्तासेऽप्यतटो जनस्य सततं [2]तावत्तृणस्पर्शवत् ॥१०

आहारार्थमितस्ततो गतिरपि स्यादेव ते सर्वदा
युष्मत्कार्यविघट्टनं[3] न भविता मत्कार्यसम्पादने ।
स्वार्थाहीनजनेन चेत् परहितं कर्त्तुं समापार्यते
को जह्यादपि वृष्टये प्रजनितो मेघो मयूरं [4]तुदेत् ॥११

सन्तो यद् वितरन्ति कोकिल कृपां दीनातिदीने जने
नो तत् कारणतः सतामिदमहो शीलश्च तेषां [5]पुनः ।
किं कुर्यान्नलिनं रवेरपि विधोः किं वा सखे कैरवं
सूर्यः पद्ममपीन्दुरुत्पलमलं[6] संफुल्लयेदेष यत् ॥१२

चित्तं मत्तमतङ्गमाशु पिक मे प्रारुह्य नाथान्तिकं
हे कृष्णेति वचोऽङ्कुशेन [7]गमयन् गच्छानिवार्यं मुदा ।
एतेनापि तवाटनेन जनितं दुःखं न भूयात् सखे
तावत् कृष्णपदं तथापि च पुनर्गोपाङ्गना पश्यतु ॥१३

अस्माकं च मनोरथोपरचितं यानं समारुह्य वा
तस्मिन् [8]सत्वरगं नियोज्य महसा तावन्मनोवाजिनम् ।
यन्तारं परिकृत्य कृष्णविरहं मत्प्राणनाथान्तिकं
गच्छानेन तदैव ते न भविता कष्टं महन्मार्गजम् ॥१४

---

१ तत्पुर्यंतां मनोऽस्य क २ तावुस्पर्श° क ३ पट्टनं क ४ मदे क, मदेत् ख ५ कलः क
६ सूर्यं पद्ममपीन्धवत्फलम् क ७ गमयन्निति पतितम् ख ८ सत्वरग क, सत्तुरगं ख

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सन्तप्तोऽसि यदातपैर्विटपिनो मूलं समासाद्य वा
विश्रामं रचयन् मुहुर्मधुपुरीं गन्तासि मारप्रिय ।
तृष्णा[1] त्वां यदि बाधते मधुरिपोर्नामामृतं संपिबन्
भुक्त्वा[2] दर्शनपुण्यजं फलमहो त्वं चेत् क्षुधापीडितः ॥१५

याः सन्त्यच्युतयोषितो मधुपुरे कंसानुचर्योऽधुना
तास्त्वां कोकिल नाम्नते [3]सुगुणिनं रे प्राणनाथप्रिय[4] ।
युष्मद्वक्त्रविनिर्गतैः सुमधुरैर्वाक्यैश्च तासां सुखं
कान्तानां [5]मधुसूदनान्तिकचरीणामेव यद् वर्धते ॥१६

यस्मिन्नेतुमिहागमन्नरपतेरादेशतो गोकुले
गोपीमानसतस्करं[6] शठवरोऽक्रूरो हि रक्तेक्षण ।
अस्माभिः किमु तत्र तस्य च कृतं किं वा यशोदादिभिः
किं नन्दादिभिरेव किं च सकलैरन्यैस्तु गोसंख्यकैः ॥१७

राधा [7]माधव ते वियोगफणिना संदंशिता तद्विषै-
राच्छन्ना तव सन्निधौ [8]विधुमुखी मां प्रेरयन्ती क्षणात् ।
मुग्धाभूदधुना किमस्ति न हि वा तन्नैव जाने सखे
गत्वा[9] तत्र समुच्यतामिति मुहुर्गोपीशनारायणे ॥१८

यावत् त्वत्पदसन्निधेः पुनरहं यास्यामि वृन्दावनं
सा [10]तावन्न जहाति माधव तनुं ते दर्शनाकाङ्क्षिणी ।
मत्तस्त्वद्वचनं निशम्य च शुभं किं वाशुभं तत्क्षणात्
कर्त्ता यद्विहितं तदेव सुतरामित्युच्यतां कोकिल ॥१९

---

१ कृष्णा क, तृणा ख २ भुक्ता क ३ सुतुलिनं क ४ 'प्रिया खं ५ 'सूदनादुरचरी क, सूधनादुरचरी ख ६ 'नाममतास्तवं क ७ माधवतो क ८ विदु° क ९ राधे क १० तावज्जहाति क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

या योषित् परिहाय भर्तृजसुखं मानं गुरूणां वचो
धर्मं कर्म जनापवादजभयं कौलीन्यलज्जे तथा[1] ।
यस्मै जीवनमर्पितं भवति सा किन्तेन हीना हरे
वाच्यं कोकिल माधवे मुहुरिदं गोपाङ्गनाघातके ॥२०

या भर्तुर्भयतस्त्वया हरवधूसम्भूय संरक्षिता
या मुक्ता परिवादतः करुणया संमुह्य[2] गोपस्त्रियः ।
या वंशीनिनदेन भर्तृभवनान्मत्तेव संनिर्गता
कस्मै नाथ [3]समर्प्य तामिह वसेरेतत् पुनः प्रक्ष्यसि ॥२१

योषिद्भिः सह माधवो मधुपुरे तिष्ठेन्मुदा वै यदा
किं वा क्रुध्यति शत्रवे किमयथा मित्रैः समावेष्टितः ।
वक्तव्यं न तदा मदीयवचनं कार्यानुरोधी यदा
रे रक्ताम्बुजलोचन प्रियगणैः साकं यदा क्रीडति ॥२२

वृन्दारण्यमिदं हि केशव यतो नाध्येपि नाकोत्तमं
गुञ्जन्मत्तमधुव्रतैश्च कुसुमैरामोदितं सुन्दरम् ।
ज्ञातं तत् किल नास्ति तत्र सरसा गोपी त्रिवक्रोपमा
वक्तव्यं हरिसन्निधाविदमपि प्राणेशमित्रोत्तम ॥२३

नाथे गच्छति षट्पदाः सुमधुरं नादं न कुर्वन्त्यहो
नो नृत्यन्ति घनागमेऽपि शिखिनो नो वान्ति वाताः शुभाः ।
नो पुष्प्यन्ति कदम्बचम्पकजवासप्तच्छदादीनि[4] च
प्रोक्तं नैव जनार्दनान्तिक इदं रे चक्रपाणिप्रिय ॥२४

---

१ °ऽपि च क, ख २ संमुह्य क ३ समार्प्य क ४ सप्तत्सदा° क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवृन्दावन इन्दुरत्र नलिनीनाथायते[1] यामिनी[2]
तावत् कालनिशायतेऽपि च मरुद्वह्नीयते [3]सूरजा ।
तप्ता वैतरणीयते पिक सदा मालापि सर्पायते
वक्तव्यं न कदापि नाथ इदमप्यस्मन्मनोऽभीष्टके ॥२५

आगन्तास्मि च गोकुले पुनरहं खेदं प्रिये मा कुरु
प्रोच्येदं पिक [4]गान्दिनीसुतरथं प्रारुह्य नाथोऽगमत् ।
ज्ञात्वा सत्यमिदं वचो मधुपुरीप्रस्थानमीक्षे[5] सदा
को जानात्यनृतं सता भगवता हन्ताच्युतेनोच्यते ॥२६

प्राणान्तेऽपि वदन्ति सत्यवचनं सन्तः पुनर्नानृतं
यच्चोक्तं खलु वृद्धपण्डितवरैर्यत्नेन शश्वत् पुरा ।
ज्ञातं प्राणहरेरनेन[6] वचसा तच्चाप्यसत्यं मया
नो जह्याच्छरणागतं हरिरिदं तच्चापि रक्तेक्षण ॥२७

गौरी कोकिल मे परा तनुरियं [7]कृष्णेन कृष्णीकृता
सुस्थं शुद्धमुदारमेव परमं चित्तं च मत्तं कृतम् ।
किं चास्यामपवादिनी परिकृता गोपालपुर्यामहं
नो तद्वेद्मि तथापि यन्मम मनस्तं चैव संचिन्तयेत् ॥२८

मह्यं यानि समर्पितानि हरिणा दुःखान्यसह्यानि वै
सह्यन्ते खलु तानि कोकिल हरेर्नाम स्मरन्त्या मया ।
किं त्वस्मिन् व्रजमण्डले भवति यो लोकापवादो महान्
हित्वा मामिति माधवो मधुपुरे यातः स नो सह्यते ॥२९

---

१ 'खायते ख २ जामिनी क ३ मुरजा क ४ सङ्गिनी' प्रारब्ध क ५ 'पन्थान' क, 'प्रारुह्य' ख ६ 'रमेन क ७ कृष्णा न कृष्णाहता क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

का वृन्दावनवासिनी मधुपुरे याते हरौ तद्गुणान्
मा वोचद् विरहेण कापि [1]रमणी मा भूत् पुनर्दुःखिता ।
हा हा कुत्र हरिर्ययाविति मुहुर्जप्त्वा[2] च का मा रुद-
न्नो [3]जानेऽहमिदं जना विरहिणी राधेति कस्माज्जगुः ॥३०

तिष्ठासन्ति न मेऽसवो मधुरिपोर्विच्छेददुःखार्दिता
नाथस्यागमनाशया पुनरमी नो वा यियासन्ति वै ।
तस्मान्मे मृतिजीवने पिक कथं स्यातां तदेवोच्यतां
किं ते दुःखमनन्तमच्युतकृतं संवच्मि वेतोऽधिकम् ॥३१

॥ इति श्रीरुद्रनाथपञ्चाननभट्टाचार्यविरचितं[4] पिकदूतं नाम काव्यं समाप्तम् ॥

---

१ रपिन्मा क २ जप्ता क ३ जाने त्व क ४ श्री····विरचितमिति ख मातृकायां नास्ति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पिकदूतश्लोकसूची

[संख्या श्लोकाङ्कसूचिका]

अस्माकं च मनोरथोप-	१४	प्राणान्तेऽपि वदन्ति	२७
अस्माकं हरये निवेद्य	९	मह्यं यानि समर्पितानि	२९
आगन्तास्मि च गोकुले	२६	यस्मिन्नेतुमिहागमत्	१७
आसीदत्र हरिर्यदा	३	यस्मै जीवनयौवनम्	८
आहारार्थमितस्ततः	११	या भर्तुर्भयतस्त्वया	२१
का वृन्दावनवासिनी	३०	या योषित् परिहाय	२०
गौरी कोकिल मे	२८	यावत् त्वत्पदसन्निधेः	१९
चित्तं मत्तमतङ्गमाशु	१३	याः सन्त्यच्युतयोषितः	१६
चेतस्तत्र समीरितं यदुपतेः	६	योषिद्भिः सह माधवः	२२
तस्मिंस्तन्निनदेन	२	राधा माधव ते	१८
तिष्ठन्त्येव हि दौत्यकर्म-	५	वृन्दारण्यमिदं हि केशव	२३
तिष्ठासन्ति न मेऽसवः	३१	श्रीनाथे मथुरां गते	१
दैत्यारेर्विरहानलः	७	श्रीवृन्दावन इन्दुरत्र	२५
नाथे गच्छति षट्पदाः	२४	सन्तप्तोऽसि यदातपैः	१५
प्रस्थानेन भविष्यति	१०	सन्तो यद् वितरन्ति	१२

सर्वास्त्वेव सभासु ४

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA